# Bharata Rashtra Vandanam

# भारतराष्ट्रवन्दनम्

## Document Information

Text title : Bharata Rashtra Vandanam

File name : bhAratarAShTravandanam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 31, 2020

*sanskritdocuments.org*

# भारतराष्ट्रवन्दनम्

(गीतिका)
नमामि राष्ट्र-भारतं गुणाकरं प्रभा-रतम् ।
विभाकरं सुधाकरं समस्त-लोक-भास्करम् ॥ नमामि० ॥

गिरीन्द्र-वृन्द-वन्दितं सदा सुधाऽऽपगावृतम् ।
प्रफुल्ल-शाखि-शोभितं सगारवैर्निनादितम् ॥ नमामि० ॥

प्ररूढ-शस्य-श्यामलं तप-प्रभा-समुज्ज्वलम् ।
श्रुतेर्निनाद-निर्मलं श्रये सदा-समुज्ज्वलम् ॥ नमामि० ॥

जय-ध्वज-प्रशोभितं त्रिवर्ण-केतु-राजितम् ।
अमित्र-मान-मर्दनं सुदृप्त-दर्प-भञ्जनम् ॥ नमामि० ॥

स्वज्ञान-दीप्ति-भास्वरं गुण-प्रभा-विकस्वरम् ।
स्व-पौरुषाप्त-रोचिष स्वयोजनाप्त-ज्योतिषम् ॥ नमामि०
प्रबुद्ध-शुद्ध-मानसं तपोविधूत-कल्मषम् ।
सदाऽर्यवृन्द-वन्दितं सुधी-प्रवीर-चर्चितम् ॥ नमामि० ॥

हुतात्म-दीप्ति-भास्वरं प्रवीर-शौर्य द्योतितम् ।
सुधा दया-गुणाकर श्रये सुखौघ-शान्ति-दम् ॥ नमामि० ॥

समस्त-विश्व-वन्दितं गुणोच्चयार्जनोच्छ्रितम् ।
अहिंसया सुखावह समस्त-विश्व-दोष-हम् ॥ नमामि० ॥

गुणाञ्चितं प्रभाञ्चितं समस्त-गौरवाञ्चितम् ।
दरिद्र-दीन-तारकं सदाऽऽर्य-वर्त्म-धारकम् ॥ नमामि० ॥

त्वदङ्घ्रि-पद्म-सेवनं समस्त-दोष-नाशनम् ।
अशेष-शोक-शोषणं सुखौघ सिन्धु-पोषणम् ॥ नमामि० ॥

Proofread by Mandar Mali

*Bharata Rashtra Vandanam*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*